अपामार्गः। इति हेमचन्द्रः॥ मोक्षः। इत्यमरः॥ जलं। इति वेदप्रयोगः।

अक्षरः त्रि, (न क्षरतीति।) अक्षरणीयः। अच्युतः। यथा,—

"तस्मै स विद्वानुपसन्नाय सम्यक्
प्रशान्तचित्ताय शमन्विताय।
येनाक्षरं पुरुषं वेद सत्यं
प्रोवाच तं तत्त्वतो ब्रह्मविद्यां"॥

इति वेदान्तसारधृता श्रुतिः॥

अपिच।

"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्व्वाणि भूतानि कूटस्थोऽक्षर उच्यते"॥

इति श्रीभगवद्गीतायां १५ अध्याये १७ श्लोकः॥ क्षरश्चाक्षरश्चेति द्वाविमौ पुरुषौ लोके प्रसिद्धौ। तावेवाह। तत्र क्षरः पुरुषो नाम सर्व्वाणि भूतानि ब्रह्मादिस्थावरान्तानि शरीराणि अविवेकिलोकस्य शरीरेष्वेव पुरुषत्वप्रसिद्धेः। कूटो राशिः शिलाराशिः पर्व्वत इव एकदेशेन नश्यत्स्वपि निर्व्विकारतया तिष्ठतीति कूटस्थश्चेतनो भोक्ता स तु अक्षरः पुरुष उच्यते विवेकिभिः। इति तट्टीकायां श्रीधरस्वामी॥

अक्षरचञ्चुः पुं, (अक्षरैर्वित्तः। तेन वित्त इति चञ्चु।) लेखकः। इत्यमरटीकायां वाचस्पतिः॥

अक्षरचणः पुं, (अक्षरैर्वित्तः। तेन वित्त इति चणप्।) लिपिकरः। इत्यमरः। मुन्सी इति भाषा॥

अक्षरचुञ्चुः पुं, (अक्षरैर्वित्तः। तेन वित्त इति चुञ्चुप्।) अक्षरचञ्चुः। लेखकः। इत्यमरः।

अक्षरजननी स्त्री, (अक्षराणाम् अक्षरस्य वा जननी उत्पादिका।) लेखनी। कलमः। यथा,—

"लेखन्यक्षरजननी वर्णमाला मसिप्रसूः"।

इति हारावलीति केचित्॥

अक्षरजीवकः पुं, (अक्षर+जीवक।) लिपिकरः। इति हेमचन्द्रः॥ ("लेखकेऽक्षरपूर्व्वाः स्युर्व्वर्णजीवकचुञ्चव"। इति हेमचन्द्रः॥)

अक्षरजीविकः पुं, (अक्षरैर्जीविका यस्य सः।) कायस्थः।

"लेखकः स्याल्लिपिकरः कायस्थोऽक्षरजीवकः"॥

इति हलायुधः। अक्षरजीविनि त्रि॥

अक्षरतूलिका स्त्री, (अक्षराणां तूलिका लेखनसाधनमित्यर्थः।) लेखनी। इति जटाधरः॥

अक्षरविन्यासः पुं, अक्षराणां विन्यासः। लिपिः। लिखनं। इत्यमरटीकायां भरतादयः॥

अक्षरमुखः पुं, (अक्षराणि मुखे तुण्डाग्रे यस्य सः।) शिष्यः। छात्रः। इति त्रिकाण्डशेषः॥

अक्षरसंस्थानं क्ली, (अक्षराणां संस्थानं विन्यासः।) लिपिः। लिखनं। इत्यमरः॥

अक्षवती स्त्री, (अक्षाः पाशकाः सन्ति अस्याम इति मतुप्। लोकात् स्त्रीत्वं।) द्यूतक्रीड़ा। पाशाखेला इति भाषा। इत्यमरः॥ (यथा महाभारते,—

"पराजितं सौवलेनाक्षवत्याम्"।)

अक्षवाटः पुं, (अक्षस्य मल्लयुद्धस्य वाटः परिसरः।) मल्लभूमिः। तत्पर्य्यायः। नियुद्धभूः २। इति हेमचन्द्रः॥ कुस्तिर आखड़ा इति भाषा॥

अक्षवित् [द्] त्रि, (अक्षं व्यवहारं द्यूतं वा वेत्ति इति विदः क्विप्।) द्यूतज्ञः। व्यवहारज्ञः॥

अक्षसूत्रं क्ली, (अक्षाणां सूत्रं माला।) अक्षमाला। जपमाला। इति जटाधरः। यथा—

"पाणौ कार्म्मुकमक्षसूत्रवलयं दण्डोऽपरः पैप्पलः"। इति महावीरचरिते।)

अक्षाग्रकीलकः पुं, (अक्षस्य नाभिच्छेद्यकाष्ठस्य अग्रे अन्ते बन्धनार्थं कीलकः।) शकटचक्रपुरोवर्त्तिकीलकः। तत्पर्य्यायः। अणिः २। इत्यमरः॥ अणी ३ आणिः ४। इति भरतः॥ चाकारखिल् इति भाषा॥

अक्षान्तिः स्त्री, (न क्षमणम्। क्षमूषहने। दिवादिः। अस्याणित्वात् क्तिन्। अनुनासिकस्येति दीर्घे नञ्समासः।) पराभ्युदयासहिष्णुत्वं। भार्य्यादेः परदर्शनाद्यसहिष्णुत्वं। इति भरतः॥ तत्पर्य्याय। ईर्ष्या २। इत्यमरः॥ ईर्षा ३ अक्षमा ४। इति शब्दरत्नावली॥ ("अक्षान्तिसारसर्व्वस्वं दुर्व्वाससमवेहि माम्"। इति विष्णुपुराणे।)

अक्षारलवणं क्ली, (न क्षारलवणम् इति नञ्समासः।) हविष्यान्नविशेषः। महाहविष्यमिति ख्यातं। यथा। "अशौचादिभक्ष्यगोक्षीरगोघृतधान्यमुद्गतिलयवसैन्धवसामुद्रलवणात्मकद्रव्यं। कृत्रिमात् लवणात् भिन्नमक्षारलवणं मतं"। इदं मतन्तु स्मार्त्तस्य। रत्नाकरमतं। यथा—

"गोक्षीरं गोघृतं चैव धान्यमुद्गयवास्तिलाः।
सामुद्रं सैन्धवञ्चैवमक्षारलवणं मतं"॥

इति नारायणवन्द्यघटीयकृतशुद्धिकारिका॥ (यथाह मनुः—

"मुन्यन्नानि पयः सोमो मांसं यच्चानुपस्कृतं।
अक्षारलवणं चैव प्रकृत्या हविरुच्यते"॥)

अक्षि क्ली, (अश्नुते अनेन। अशू व्याप्तौ संघाते च। अशेर्णिदिति क्सिः। यद्वा। अक्ष्णाति। अक्षू व्याप्तौ। इन्।) चक्षुः। इत्यमरः। चक्षुर्गोलकः। इति केचित्॥

अक्षिकः पुं, रञ्जनद्रुः। आच् इति भाषा। इति रत्नमाला॥

अक्षिकूटकः पुं, (अक्षि+कूटक।) चक्षुस्तारा॥

अक्षिगतः त्रि, (अक्षि गतः, अक्षिविषय इव छेद्यः इत्यर्थः।) द्वेष्यः। इत्यमरः॥

अक्षिभेषजः पुं, (अक्षि+भेषज।) पट्टिकालोध्रः। इति राजनिर्घण्टः॥ (क्ली, नेत्रौषधम्।)

अक्षिवः पुं, (अक्षि वाति वायति वा। वा गतिबन्धनयोः। आतोऽनुपेति कः।) शोभाञ्जनवृक्षः। सामुद्रलवणे क्ली। इत्यमरटीकायां भरतः॥

अक्षिविकूणितं क्ली, (अक्षि+वि+कूण+भावे क्त।) कटाक्षः। अपाङ्गदृष्टिः। इति हेमचन्द्रः॥

अक्षीकः पुं, रञ्जनद्रुः। आच् इति भाषा। इति रत्नमाला॥

अक्षीवं क्ली, (न क्षीवति अनेन वा अक्षीवयति वा। क्षीव मदे। पचाद्यच्।) समुद्रलवणं। इत्यमरः।

अक्षीवः त्रि, (न क्षीवति माद्यति इति न+क्षीव+अच्।) अमत्तः। इति मेदिनी।

अक्षीवः पुं, शोभाञ्जनवृक्षः। इत्यमरः॥

अक्षुण्णः त्रि, (न क्षुण्ण इति नञ्समासः।) अक्षोदितः। अचूर्णितः। इति क्षुदधात्वर्थदर्शनात्। अच्छिन्नः। यथा। अक्षुण्णं परिवप। इति चूड़ाकरणे पशुपतिः॥

अक्षुब्धः त्रि, क्षोभरहितः। अक्षोभितः। इति क्षुभधातोः क्तप्रत्यये क्षुब्धः। ततो न क्षुब्धः अक्षुब्ध इति नञ्समासनिष्पन्नः॥

अक्षेमं क्ली, (न क्षेमम् इति नञ्समासः।) अमङ्गलं। यथा—

"किन्नु तेषां गृहे क्षेममक्षेमं किन्नु साम्प्रतम्।
कथन्ते किन्नु सद्वृत्ता दुर्वृत्ताः किन्नु मे सुताः"॥

इति देवीमाहात्म्ये १ अध्यायः॥

अक्षोटः पुं, (अक्ष्णोति। अक्षू व्याप्तौ संघाते च। बाहुलकादोटः॥ अक्षस्येव उटाः पर्णानि अस्य इति वा।) अक्षोड़वृक्षः। स च पर्व्वतजपीलुवृक्षः। इत्यमरटीकायां भरतः॥ आखरोट् इति हिन्दीभाषा। इति राजनिर्घण्टः॥

"पीलुः शैलभवोऽक्षोटः कर्परालश्च कीर्त्तितः।
अक्षोटकोऽपि वातादसदृशः कफपित्तकृत्"॥

इति भावप्रकाशः॥

अक्षोड़ः पुं, (अक्ष्णोति इति अक्ष+ओड़प्रत्ययः।) पर्व्वतोत्पन्नपीलुवृक्षः। तत्पर्य्यायः। कर्परालः २ कन्दरालः ३ आक्षोड़ः ४ अक्षोटः ५ आक्षोटः ६। इत्यमरः तट्टीका च॥

अक्षोड़कः पुं, (अक्षोड़ एव इति स्वार्थे कन्।) पर्व्वतोत्पन्नपीलुवृक्षः। इति रत्नमाला॥

अक्षोभः पुं, (न क्षोभ इति नञ्समासः। नास्ति क्षोभो यस्येति वा।) हस्तिबन्धनस्तम्भः। तत्पर्य्यायः। आलानं २ शङ्कुः ३। इति त्रिकाण्डशेषः॥ क्षोभरहिते त्रि॥

अक्षौरिमं क्ली, क्षुरिकर्म्मविहितनक्षत्रं। यथा,—

"उत्तरात्रितयाम्यरोहिणी-
रौद्रसर्पपितृभेषु चाश्विभे।
श्मश्रुकर्म्म सकलं विवर्ज्जयेत्
प्रेतकार्य्यमपि बुद्धिमान् नरः॥
चन्द्रशुद्धिर्यदा नास्ति ताराया विशेषतः।
अक्षौरिभेऽपि कर्त्तव्यं चन्द्रचन्द्रजयोर्दिने"॥

इति ज्योतिस्तत्त्वं॥

अक्षौहिणी स्त्री, (ऊहः समूहः अस्ति अस्या इति इनिः। अक्षाणाम् ऊहिनी। पूर्व्वपदादिति णत्वम्। अक्षादूहिन्यामिति वृद्धिः।) सङ्ख्याविशेषयुक्तसेना। तद्यथा। २१८७० हस्तिनः। २१८७० रथाः। ६५६१० घोटकाः। १०९३५० पदातयः। समुदायेन २१८७००। तथा चोक्तं।

"अक्षौहिण्यामित्यधिकैः सप्तत्यन्ताष्टभिः शतैः।